# Mahanarayana Upanishad with Vedic Accent

# મહાનારાયણોપનિષત્ સસ્વરાઃ

## Document Information

Text title : Mahanarayana Upanishad with Vedic Accent

File name : mahAnArAyaNopaniShatsasvarA.itx

Category : upanishhat, narayana, svara

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi Mandar Mali

Proofread by : Sunder Hattangadi, Mandar Mali aryavrutta at gmail.com

Description-comments : 18/108; Krishna YajurVeda, Vaishnava Upanishad, Taittiriya Aranyaka. Strictly not in 108 mentioned in Muktika upanishad.

Latest update : August 13, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 14, 2023

*sanskritdocuments.org*

# Mahanarayana Upanishad with Vedic Accent

## મહાનારાયણોપનિષત્ સસ્વરાઃ

શાન્તિપાઠઃ ।

હરિઃ ૐ ॥ શં નો મિત્રઃ શં વરુણઃ । શં નો ભવત્ત્વર્યમા ।

શં ન ઇન્દ્રો બૃહસ્પતિઃ । શં નો વિષ્ણુરુરુક્રમઃ ॥

નમો બ્રહ્મણે । નમસ્તે વાયો । ત્વમેવ પ્રત્યક્ષં બ્રહ્માસિ ।

ત્વામેવ પ્રત્યક્ષં બ્રહ્મ વદિષ્યામિ । ઋતં વદિષ્યામિ ।

સત્યં વદિષ્યામિ । તન્મામવતુ । તદ્વક્તારમવતુ ।

અવતુ મામ્ । અવતુ વક્તારમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।

તેજસ્વિ નાવધીતમસ્તુ । મા વિદ્વિષાવહૈ ।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

પ્રથમોઽનુવાકઃ ।

અમ્ભસ્યપારે ભુવનસ્ય મધ્યે નાકસ્ય પૃષ્ઠે મહતો મહીયાન્ ।

શુક્રેણ જ્યોતીઁષિ સમનુપ્રવિષ્ટઃ પ્રજાપતિશ્ચરતિ ગર્ભે અન્તઃ ॥ ૧॥

યસ્મિન્નિદઁ સં ચ વિ ચૈતિ સર્વં યસ્મિન્ દેવા અધિ વિશ્વે નિષેદુઃ ।

તદેવ ભૂતં તદુ ભવ્યમા ઇદં તદક્ષરે પરમે વ્યોમન્ ॥ ૨॥

યેનાવૃતં ખં ચ દિવં મહીં ચ યેનાદિત્યસ્તપતિ તેજસા ભ્રાજસા ચ ।

યમન્તઃ સમુદ્રે કવયો વયન્તિ યદક્ષરે પરમે પ્રજાઃ ॥ ૩॥

યતઃ પ્રસૂતા જગતઃ પ્રસૂતી તોયેન જીવાન્ વ્યચસર્જ ભૂમ્યામ્ ।

યદોષધીભિઃ પુરુષાન્ પશૂઁશ્ચ વિવેશ ભૂતાનિ ચરાચરાણિ ॥ ૪॥

અતઃ પરં નાન્યદણીયસઁ હિ પરાત્પરં યન્મહતો મહાન્તમ્ ।

યદેકમવ્યક્તમનન્તરૂપં વિશ્વં પુરાણં તમસઃ પરસ્તાત્ ॥ ૫॥

તદેવર્તં તદુ સત્યમાહુસ્તદેવ બ્રહ્મ પરમં કવીનામ્ ।

ઇષ્ટાપૂર્તં બહુધા જાતં જાયમાનં વિશ્વં બિભર્તિ ભુવનસ્ય નાભિઃ ॥ ૬॥

તદેવાગ્નિસ્તદ્વાયુસ્તત્સૂર્યસ્તદુ ચન્દ્રમાઃ ।

તદેવ શુક્રમમૃતં તદ્બ્રહ્મ તદાપઃ સ પ્રજાપતિઃ ॥ ૭॥

સર્વે નિમેષા જજ્ઞિરે વિદ્યુતઃ પુરુષાદધિ ।

કલા મુહૂર્તાઃ કાષ્ઠાશ્ચાહોરાત્રાશ્ચ સર્વશઃ ॥ ૮॥

અર્ધમાસા માસા ઋતવઃ સંવત્સરશ્ચ કલ્પન્તામ્ ।

સ આપઃ પ્રદુઘે ઉભે ઇમે અન્તરિક્ષમથો સુવઃ ॥ ૯॥

નૈનમૂર્ધ્વં ન તિર્યઞ્ચં ન મધ્યે પરિજગ્રભત્ ।

ન તસ્યેશે કશ્ચન તસ્ય નામ મહદ્યશઃ ॥ ૧૦॥

ન સંદૃશે તિષ્ઠતિ રૂપમસ્ય ન ચક્ષુષા પશ્યતિ કશ્ચનૈનમ્ ।

હૃદા મનીષા મનસાભિક્લૃપ્તો ય એનં વિદુરમૃતાસ્તે ભવન્તિ ॥ ૧૧॥

પરમાત્મ - હિરણ્યગર્ભ - સૂક્તમ્

અદ્ભ્યઃ સમ્ભૂતો હિરણ્યગર્ભ ઇત્યષ્ટૌ ॥

અદ્ભ્ય સમ્ભૂતઃ પૃથિવ્યૈ રસાચ્ચ, વિશ્વકર્મણઃ સમવર્તતાધિ ।

તસ્ય ત્વષ્ટા વિદધદ્રૂપમેતિ, તત્પુરુષસ્ય વિશ્વમાજાનમગ્રે ॥ ૧॥

વેદાહમેતં પુરુષં મહાન્તમ્, આદિત્યવર્ણં તમસઃ પરસ્તાત્ ।

તમેવં વિદ્વાનમૃત ઇહ ભવતિ, નાન્યઃપન્થા વિદ્યતેઽયનાય ॥ ૨॥

પ્રજાપતિશ્ચરતિ ગર્ભે અન્તઃ, અજાયમાનો બહુધા વિજાયતે ।

તસ્ય ધીરાઃ પરિજાનન્તિ યોનિમ્, મરીચીનાં પદમિચ્છન્તિ વેધસઃ ॥ ૩॥

યો દેવેભ્ય આતપતિ, યો દેવાનાં પુરોહિતઃ ।

પૂર્વો યો દેવેભ્યોજાતઃ, નમો રુચાય બ્રાહ્મયે ॥ ૪॥

રુચં બ્રાહ્મં જનયન્તઃ, દેવા અગ્રે તદબ્રુવન્ ।

યસ્ત્વૈવં બ્રાહ્મણો વિદ્યાત્, તસ્ય દેવા અસન્ વશે ॥ ૫॥

હ્રીશ્ચ તે લક્ષ્મીશ્ચ પત્ન્યૌ, અહોરાત્રે પાર્શ્વે, નક્ષત્રાણિ રૂપમ્ ।

અશ્વિનૌ વ્યાત્તમ્, ઇષ્ટં મનિષાણ, અમું મનિષાણ, સર્વં મનિષાણ ॥ ૬॥

ઇતિ ઉત્તરનારાયણાનુવાકઃ ।

હિરણ્યગર્ભઃ સમવર્તતાગ્રે, ભૂતસ્ય જાતઃ પતિરેક આસીત્ ।
સ દાધાર પૃથિવીં દ્યામુતેમાં કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૧॥

યઃ પ્રાણતો નિમિષતો મહિત્વૈક ઇદ્રાજા જગતો બભૂવ ।
ય ઈશે અસ્ય દ્વિપદશ્ચતુષ્પદઃ કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૨॥

ય આત્મદા બલંદા યસ્ય વિશ્વ ઉપાસતે પ્રશિષં યસ્ય દેવાઃ ।
યસ્ય છાયામૃતં યસ્ય મૃત્યુઃ કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૩॥

યસ્યેમે હિમવન્તો મહિત્વા યસ્ય સમુદ્રꣳ રસયા સહાહુઃ ।
યસ્યેમાઃ પ્રદિશો યસ્ય બાહૂ કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૪॥

યં ક્રન્દસી અવસા તસ્તભાને અભ્યૈક્ષેતાં મનસા રેજમાને ।
યત્રાધિ સૂર ઉદિતૌ વ્યેતિ કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૫॥

યેન દ્યૌરુગ્રા પૃથિવી ચ દૃઢે યેન સુવઃ સ્તભિતં યેન નાકઃ ।
યો અન્તરિક્ષે રજસો વિમાનઃ કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૬॥

આપો હ યન્મહતીર્વિશ્વમાયં દક્ષં દધાના જનયન્તીરગ્નિમ્ ।
તતો દેવાનાં નિરવર્તતાસુરેકઃ કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૭॥

યશ્ચિદાપો મહિના પર્યપશ્યદ્દક્ષં દધાના જનયન્તીરગ્નિમ્ ।
યો દેવેશ્વધિ દેવ એક આસીત્ કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૮॥

એષ હિ દેવઃ પ્રદિશોઽનુ સર્વાઃ
પૂર્વો હિ જાતઃ સ ઉ ગર્ભે અન્તઃ ।
સ વિજાયમાનઃ સ જનિષ્યમાણઃ
પ્રત્યઙ્મુખાસ્તિષ્ઠતિ વિશ્વતોમુખઃ ॥ ૧૨॥

વિશ્વતશ્ચક્ષુરુત વિશ્વતોમુખો વિશ્વતોહસ્ત ઉત વિશ્વતસ્પાત્ ।
સં બાહુભ્યાં નમતિ સં પતત્રૈર્દ્યાવાપૃથિવી જનયન્ દેવ એકઃ ॥ ૧૩॥

વેનસ્તત્ પશ્યન્ વિશ્વા ભુવનાનિ વિદ્વાન્ યત્ર વિશ્વં ભવત્યેકનીડમ્ ।
યસ્મિન્નિદꣳ સં ચ વિ ચૈકꣳ સ ઓતઃ પ્રોતશ્ચ વિભુઃ પ્રજાસુ ॥ ૧૪॥

પ્ર તદ્વોચે અમૃતં નુ વિદ્વાન્ ગન્ધર્વો નામ નિહિતં ગુહાસુ ।
ત્રીણિ પદા નિહિતા ગુહાસુ યસ્તદ્વેદ સવિતુઃ પિતા સત્ ॥ ૧૫॥
સ નો બન્ધુર્જનિતા સ વિધાતા ધામાનિ વેદ ભુવનાનિ વિશ્વા ।
યત્ર દેવા અમૃતમાનશાનાસ્તૃતીયે ધામાન્યભ્યૈરયન્ત ॥ ૧૬॥
પરિ દ્યાવાપૃથિવી યન્તિ સદ્યઃ પરિ લોકાન્ પરિ દિશઃ પરિ સુવઃ ।
ઋતસ્ય તન્તું વિતતં વિચૃત્ય તદપશ્યત્ તદભવત્ પ્રજાસુ ॥ ૧૭॥
પરીત્ય લોકાન્ પરીત્ય ભૂતાનિ પરીત્ય સર્વાઃ પ્રદિશો દિશશ્ચ ।
પ્રજાપતિઃ પ્રથમજા ઋતસ્યાત્મનાત્માનમભિસમ્બભૂવ ॥ ૧૮॥
સદસસ્પતિમદ્ભુતં પ્રિયમિન્દ્રસ્ય કામ્યમ્ ।
સનિં મેધામયાસિષમ્ ॥ ૧૯॥
ઉદ્દીપ્યસ્વ જાતવેદોઽપઘ્નન્નિરૃતિં મમ ।
પશૂꣳશ્ચ મહ્યમાવહ જીવનં ચ દિશો દિશ ॥ ૨૦॥
મા નો હિꣳસીજ્જાતવેદો ગામશ્વં પુરુષં જગત્ ।
અબિભ્રદગ્ન આગહિ શ્રિયા મા પરિપાતય ॥ ૨૧॥
પુરુષસ્ય વિદ્મ સહસ્રાક્ષસ્ય મહાદેવસ્ય ધીમહિ ।
તન્નો રુદ્રઃ પ્રચોદયાત્ ॥ ૨૨॥
તત્પુરુષાય વિદ્મહે મહાદેવાય ધીમહિ ।
તન્નો રુદ્રઃ પ્રચોદયાત્ ॥ ૨૩॥
તત્પુરુષાય વિદ્મહે વક્રતુણ્ડાય ધીમહિ ।
તન્નો દન્તિઃ પ્રચોદયાત્ ॥ ૨૪॥
તત્પુરુષાય વિદ્મહે ચક્રતુણ્ડાય ધીમહિ ।
તન્નો નન્દિઃ પ્રચોદયાત્ ॥ ૨૫॥
તત્પુરુષાય વિદ્મહે મહાસેનાય ધીમહિ ।
તન્નઃ ષણ્મુખઃ પ્રચોદયાત્ ॥ ૨૬॥
તત્પુરુષાય વિદ્મહે સુવર્ણપક્ષાય ધીમહિ ।

તન્નો ગરુડઃ પ્રચોદયાત્ ॥ ૨૭॥

વેદાત્મનાય વિદ્મહે હિરણ્યગર્ભાય ધીમહિ ।

તન્નો બ્રહ્મ પ્રચોદયાત્ ॥ ૨૮॥

નારાયણાય વિદ્મહે વાસુદેવાય ધીમહિ ।

તન્નો વિષ્ણુઃ પ્રચોદયાત્ ॥ ૨૯॥

વજ્રનખાય વિદ્મહે તીક્ષ્ણદꣳષ્ટ્રાય ધીમહિ ।

તન્નો નારસિꣳહઃ પ્રચોદયાત્ ॥ ૩૦॥

ભાસ્કરાય વિદ્મહે મહદ્દ્યુતિકરાય ધીમહિ ।

તન્નો આદિત્યઃ પ્રચોદયાત્ ॥ ૩૧॥

વૈશ્વાનરાય વિદ્મહે લાલીલાય ધીમહિ ।

તન્નો અગ્નિઃ પ્રચોદયાત્ ॥ ૩૨॥

કાત્યાયનાય વિદ્મહે કન્યાકુમારિ ધીમહિ ।

તન્નો દુર્ગિઃ પ્રચોદયાત્ ॥ ૩૩॥

પાઠભેદઃ

ચતુર્મુખાય વિદ્મહે કમણ્ડલુધરાય ધીમહિ ।
તન્નો બ્રહ્મા પ્રચોદયાત્ ॥

આદિત્યાય વિદ્મહે સહસ્રકિરણાય ધીમહિ ।
તન્નો ભાનુઃ પ્રચોદયાત્ ॥

પાવકાય વિદ્મહે સપ્તજિહ્વાય ધીમહિ ।
તન્નો વૈશ્વાનરઃ પ્રચોદયાત્ ॥

મહાશૂલિન્યૈ વિદ્મહે મહાદુર્ગાયૈ ધીમહિ ।
તન્નો ભગવતી પ્રચોદયાત્ ॥

સુભગાયૈ વિદ્મહે કમલમાલિન્યૈ ધીમહિ ।
તન્નો ગૌરી પ્રચોદયાત્ ॥

નવકુલાય વિદ્મહે વિષદન્તાય ધીમહિ ।
તન્નઃ સર્પઃ પ્રચોદયાત્ ॥

સહસ્રપરમા દેવી શતમૂલા શતાઙ્કુરા ।

સર્વꣳ હરતુ મે પાપં દૂર્વા દુઃસ્વપ્નનાશિની ॥ ૩૪॥
કાણ્ડાત્ કાણ્ડાત્ પ્રરોહન્તી પરુષઃ પરુષઃ પરિ ।
એવા નોદૂર્વે પ્રતનુ સહસ્રેણ શતેન ચ ॥ ૩૫॥
યા શતેન પ્રતનોષિ સહસ્રેણ વિરોહસિ ।
તસ્યાસ્તે દેવીષ્ટકે વિધેમ હવિષા વયમ્ ॥ ૩૬॥
અશ્વક્રાન્તે રથક્રાન્તે વિષ્ણુક્રાન્તે વસુન્ધરા ।
શિરસા ધારયિષ્યામિ રક્ષસ્વ માં પદે પદે ॥ ૩૭॥
ભૂમિર્ધેનુર્ધરણી લોકધારિણી ।
ઉદ્ધૃતાસિ વરાહેણ કૃષ્ણેન શતબાહુના ॥ ૩૮॥
મૃત્તિકે હન મે પાપં યન્મયા દુષ્કૃતં કૃતમ્ ।
મૃત્તિકે બ્રહ્મદત્તાસિ કાશ્યપેનાભિમન્ત્રિતા ।
મૃત્તિકે દેહિ મે પુષ્ટિં ત્વયિ સર્વં પ્રતિષ્ઠિતમ્ ॥ ૩૯॥
મૃત્તિકે પ્રતિષ્ઠિતે સર્વં તન્મે નિર્ણુદ મૃત્તિકે ।
ત્વયા હતેન પાપેન ગચ્છામિ પરમાં ગતિમ્ ॥ ૪૦॥
યત ઇન્દ્ર ભયામહે તતો નો અભયં કૃધિ ।
મઘવઞ્છગ્ધિ તવ તન્ન ઊતયે વિદ્વિષો વિમૃધો જહિ ॥ ૪૧॥
સ્વસ્તિદા વિશસ્પતિર્વૃત્રહા વિમૃધો વશી ।
વૃષેન્દ્રઃ પુર એતુ નઃ સ્વસ્તિદા અભયઙ્કરઃ ॥ ૪૨॥
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ ન સ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥ ૪૩॥
આપાન્તમન્યુસ્તૃપલપ્રભર્મા ધુનિઃ શિમીવાઞ્છરુમાꣳ ઋજીષી ।
સોમો વિશ્વાન્યતસાવનાનિ નાર્વાગિન્દ્રં પ્રતિમાનાનિ દેભુઃ ॥ ૪૪॥
બ્રહ્મજજ્ઞાનં પ્રથમં પુરસ્તાદ્વિ સીમતઃ સુરુચો વેન આવઃ ।
સ બુધ્નિયા ઉપમા અસ્ય વિષ્ઠાઃ સતશ્ચ યોનિમસતશ્ચ વિવઃ ॥ ૪૫॥
સ્યોના પૃથિવિ ભવાન્ નૃક્ષરા નિવેશની ।
યચ્છા નઃ શર્મ સપ્રથાઃ ॥ ૪૬॥

ગન્ધદ્વારાં દુરાધર્ષાં નિત્યપુષ્ટાં કરીષિણીમ્ ।
ઈશ્વરીꣳ સર્વભૂતાનાં તામિહોપહ્વયે શ્રિયમ્ ॥ ૪૭॥

શ્રીર્મે ભજતુ, અલક્ષ્મીર્મે નશ્યતુ ।
વિષ્ણુમુખા વૈ દેવાશ્છન્દોભિરિમાઁલ્લોકાનનપજય્યમભ્યજયન્ ।
મહાꣳ ઇન્દ્રો વજ્રબાહુઃ ષોડશી શર્મ યચ્છતુ ॥ ૪૮॥

સ્વસ્તિ નો મઘવા કરોતુ । હન્તુ પાપ્માનં યોઽસ્માન્ દ્વેષ્ટિ ॥ ૪૯॥

સોમાનꣳ સ્વરણં કૃણુહિ બ્રહ્મણસ્પતે, કક્ષીવન્તં ય ઔશિજમ્ ।
શરીરં યજ્ઞશમલં કુસીદં તસ્મિન્ત્સીદતુ યોઽસ્માન્ દ્વેષ્ટિ ॥ ૫૦॥

ચરણં પવિત્રં વિતતં પુરાણં યેન પૂતસ્તરતિ દુષ્કૃતાનિ ।
તેન પવિત્રેણ શુદ્ધેન પૂતા અતિ પાપ્માનમરાતિં તરેમ ॥ ૫૧॥

સજોષા ઇન્દ્ર સગણો મરુદ્ભિઃ સોમં પિબ વૃત્રહઞ્છૂર વિદ્વાન્ ।
જહિ શત્રૂꣳ રપ મૃધો નુદસ્વાથાભયં કૃણુહિ વિશ્વતો નઃ ॥ ૫૨॥

સુમિત્રા ન આપ ઓષધયઃ સન્તુ ।
દુર્મિત્રાસ્તસ્મૈ ભૂયાસુર્યોઽસ્માન્ દ્વેષ્ટિ યં ચ વયં દ્વિષ્મઃ ॥ ૫૩॥

આપો હિ ષ્ઠા મયોભુવસ્તા ન ઊર્જે દધાતન । મહે રણાય
ચક્ષસે । યો વઃ શિવતમો રસસ્તસ્ય ભાજયતેઽહ નઃ ।
ઉશતીરિવ માતરઃ । તસ્મા અરં ગમામ વો યસ્ય ક્ષયાય
જિન્વથ । આપો જનયથા ચ નઃ ॥ ૫૪॥

હિરણ્યશૃઙ્ગં વરુણં પ્રપદ્યે તીર્થં મે દેહિ યાચિતઃ ।
યન્મયા ભુક્તમસાધૂનાં પાપેભ્યશ્ચ પ્રતિગ્રહઃ ॥ ૫૫॥

યન્મે મનસા વાચા કર્મણા વા દુષ્કૃતં કૃતમ્ ।
તન્ન ઇન્દ્રો વરુણો બૃહસ્પતિઃ સવિતા ચ પુનન્તુ પુનઃ પુનઃ ॥ ૫૬॥

નમોઽગ્નયેઽપ્સુમતે નમ ઇન્દ્રાય નમો વરુણાય નમો વારુણ્યૈ
નમોઽદ્ભ્યઃ ॥ ૫૭॥

યદપાં ક્રૂરં યદમેધ્યં યદશાન્તં તદપગચ્છતાત્ ॥ ૫૮॥

અત્યાશનાદતીપાનાદ્ યચ્ચ ઉગ્રાત્ પ્રતિગ્રહાત્ ।
તન્મે વરુણો રાજા પાણિના હ્યવમર્શતુ ॥ ૫૯॥
સોઽહમપાપો વિરજો નિર્મુક્તો મુક્તકિલ્બિષઃ ।
નાકસ્ય પૃષ્ઠમારુહ્ય ગચ્છેદ્બ્રહ્મસલોકતામ્ ॥ ૬૦॥
યશ્ચાપ્સુ વરુણઃ સ પુનાત્વઘમર્ષણઃ ॥ ૬૧॥
ઇમં મે ગઙ્ગે યમુને સરસ્વતિ શુતુદ્રિ સ્તોમꣳ સચતા પરુષ્ણિયા ।
અસિક્નિઅ મરુદ્વૃધે વિતસ્તયાર્જીકીયે શ્રુણુહ્યા સુષોમયા ॥ ૬૨॥
ઋતં ચ સત્યં ચાભીદ્ધાત્તપસોઽધ્યજાયત ।
તતો રાત્રિરજાયત તતઃ સમુદ્રો અર્ણવઃ ॥ ૬૩॥
સમુદ્રાદર્ણવાદધિ સંવત્સરો અજાયત ।
અહોરાત્રાણિ વિદધદ્વિશ્વસ્ય મિષુતો વુશી ॥ ૬૪॥
સૂર્યાચન્દ્રમસૌ ધાતા યથાપૂર્વમકલ્પયત્ ।
દિવં ચ પૃથિવીં ચાન્તરિક્ષમથો સુવઃ ॥ ૬૫॥
યત્પૃથિવ્યાꣳ રજઃ સ્વમાન્તરિક્ષે વિરોદસી ।
ઇમાꣳ સ્તદાપો વરુણઃ પુનાત્વઘમર્ષણઃ ॥
પુનન્તુ વસવઃ પુનાતુ વરુણઃ પુનાત્વઘમર્ષણઃ ।
એષ ભૂતસ્ય મધ્યે ભુવનસ્ય ગોપ્તા ॥
એષ પુણ્યકૃતાં લોકાનેષ મૃત્યોર્હિરણ્મયમ્ ।
દ્યાવાપૃથિવ્યોર્હિરણ્મયꣳ સꣳ શ્રિતꣳ સુવઃ ।
સ નઃ સુવઃ સꣳ શિશાધિ ॥ ૬૬॥
આર્દ્રં જ્વલતિજ્યોતિરહમસ્મિ । જ્યોતિર્જ્વલતિ બ્રહ્માહમસ્મિ ।
યોઽહમસ્મિ બ્રહ્માહમસ્મિ । અહમસ્મિ બ્રહ્માહમસ્મિ । અહમેવાહં
માં જુહોમિ સ્વાહા ॥ ૬૭॥
અકાર્યકાર્યવકીર્ણી સ્તેનો ભ્રૂણહા ગુરુતલ્પગઃ ।
વરુણોઽપામઘમર્ષણસ્તસ્માત્ પાપાત્ પ્રમુચ્યતે ॥ ૬૮॥
રજોભૂમિસ્ત્વ માꣳ રોદયસ્વ પ્રવદન્તિ ધીરાઃ ॥ ૬૯॥

આક્રાન્ત્સમુદ્રઃ પ્રથમે વિધર્મઞ્જનયન્પ્રજા ભુવનસ્ય રાજા ।
વૃષા પવિત્રે અધિ સાનો અવ્યે બૃહત્સોમો વાવૃધે સુવાન ઇન્દુઃ ॥ ૭૦॥

દ્વિતીયોઽનુવાકઃ ।

જાતવેદસે સુનવામ સોમમરાતીયતો નિદહાતિ વેદઃ ।
સ નઃ પર્ષદતિ દુર્ગાણિ વિશ્વા નાવેવ સિન્ધું દુરિતાત્યગ્નિઃ ॥ ૧॥

દુર્ગા સૂક્તમ્ ।
તામગ્નિવર્ણાં તપસા જ્વલન્તીં વૈરોચનીં કર્મફલેષુ જુષ્ટામ્ ।
દુર્ગાં દેવીꣳ શરણમહં પ્રપદ્યે સુતરસિ તરસે નમઃ ॥ ૨॥

અગ્ને ત્વં પારયા નવ્યો અસ્માન્ સ્વસ્તિભિરતિ દુર્ગાણિ વિશ્વા ।
પૂશ્ચ પૃથ્વી બહુલા ન ઉર્વી ભવા તોકાય તનયાય શંયોઃ ॥ ૩॥

વિશ્વાનિ નો દુર્ગહા જાતવેદઃ સિન્ધું ન નાવા દુરિતાતિપર્ષિ ।
અગ્ને અત્રિવન્મનસા ગૃણાનોઽસ્માકં બોધ્યવિતા તનૂનામ્ ॥ ૪॥

પૃતનાજિતꣳ સહમાનમુગ્રમગ્નિꣳ હુવેમ પરમાત્સધસ્થાત્ ।
સ નઃ પર્ષદતિ દુર્ગાણિ વિશ્વા ક્ષામદ્દેવો અતિ દુરિતાત્યગ્નિઃ ॥ ૫॥

પ્રત્નોષિ કમીડ્યો અધ્વરેષુ સનાચ્ચ હોતા નવ્યશ્ચ સત્સિ ।
સ્વાં ચાગ્ને તનુવં પિપ્રયસ્વાસ્મભ્યં ચ સૌભગમાયજસ્વ ॥ ૬॥

ગોભિર્જુષ્ટમયુજો નિષિક્તં તવેન્દ્ર વિષ્ણોરનુસઞ્ચરેમ ।
નાકસ્ય પૃષ્ઠમભિ સંવસાનો વૈષ્ણવીં લોક ઇહ માદયન્તામ્ ॥ ૭॥

તૃતીયોઽનુવાકઃ ।

ભૂરન્નમગ્નયે પૃથિવ્યૈ સ્વાહા ભુવોઽન્નં
વાયવેઽન્તરિક્ષાય સ્વાહા સુવરન્નમાદિત્યાય દિવે સ્વાહા
ભૂર્ભુવસ્સુવરન્નં ચન્દ્રમસે દિગ્ભ્યઃ સ્વાહા નમો દેવેભ્યઃ
સ્વધા પિતૃભ્યો ભૂર્ભુવઃ સુવરન્નમોમ્ ॥ ૧॥

ચતુર્થોઽનુવાકઃ ।

ભૂરગ્નયે પૃથિવ્યૈ સ્વાહા ભુવો વાયવેઽન્તરિક્ષાય સ્વાહા

સુવરાદિત્યાય દિવે સ્વાહા ભૂર્ભુવસ્સુવશ્ચન્દ્રમસે દિગ્ભ્યઃ
સ્વાહા નમો દેવેભ્યઃ સ્વધા પિતૃભ્યો ભૂર્ભુવઃ સુવરગ્ન ઓમ્ ॥ ૧॥

પઞ્ચમોઽનુવાકઃ ।

ભૂરગ્નયે ચ પૃથિવ્યૈ ચ મહતે ચ સ્વાહા, ભુવો વાયવે
ચાન્તરિક્ષાય ચ મહતે ચ સ્વાહા, સુવરાદિત્યાય ચ દિવે ચ
મહતે ચ સ્વાહા ભૂર્ભુવસ્સુવશ્ચન્દ્રમસે ચ નક્ષત્રેભ્યશ્ચ
દિગ્ભ્યશ્ચ મહતે ચ સ્વાહા નમો દેવેભ્યઃ સ્વધા પિતૃભ્યો
ભૂર્ભુવઃ સુવર્મહરોમ્ ॥ ૧॥

ષષ્ઠોઽનુવાકઃ ।

પાહિ નો અગ્ન એનસે સ્વાહા પાહિ નો વિશ્વવેદસે સ્વાહા,
યજ્ઞં પાહિ વિભાવસો સ્વાહા સર્વં પાહિ શતક્રતો સ્વાહા ॥ ૧॥

સપ્તમોઽનુવાકઃ ।

પાહિ નો અગ્ન એકયા, પાહ્યુત દ્વિતીયયા, પાહ્યૂર્જં તૃતીયયા
પાહિ ગીર્ભિશ્ચતસૃભિર્વસો સ્વાહા ॥ ૧॥

અષ્ટમોઽનુવાકઃ ।

યશ્છન્દસામૃષભો વિશ્વરૂપશ્છન્દોભ્યશ્ચન્દાꣳસ્યાવિવેશ ।
સતાꣳ શિક્યઃ પ્રોવાચોપનિષદિન્દ્રો જ્યેષ્ઠ ઇન્દ્રિયાય ઋષિભ્યો નમો
દેવેભ્યઃ સ્વધા પિતૃભ્યો ભૂર્ભુવસ્સુવશ્છન્દ ઓમ્ ॥ ૧॥

નવમોઽનુવાકઃ ।

નમો બ્રહ્મણે ધારણં મે અસ્ત્વનિરાકરણં ધારયિતા ભૂયાસં
કર્ણયોઃ શ્રુતં મા ચ્યોઢ્ઢં મમામુષ્ય ઓમ્ ॥ ૧॥

દશમોઽનુવાકઃ ।

ઋતં તપઃ સત્યં તપઃ શ્રુતં તપઃ શાન્તં તપો દમસ્તપઃ
શમસ્તપો દાનં તપો યજ્ઞં તપો ભૂર્ભુવઃ સુવર્બ્રહ્મૈતદુપાસ્વૈતત્તપઃ ॥ ૧॥

એકાદશોઽનુવાકઃ ।

યથા વૃક્ષસ્ય સમ્પુષ્પિતસ્ય દૂરાદ્ગન્ધો વાત્યેવં પુણ્યસ્ય

કર્મણો દૂરાદ્ગન્ધો વાતિ યથાસિધારાં કર્તેઽવહિતમવક્રામે
યદ્યુવે યુવે હવા વિહ્વયિષ્યામિ કર્તં
પતિષ્યામીત્યેવમમૃતાદાત્માનં જુગુપ્સેત્ ॥ ૧॥

દ્વાદશોઽનુવાકઃ ।

અણોરણીયાન્ મહતો મહીયાનાત્મા ગુહાયાં નિહિતોઽસ્ય જન્તોઃ ।
તમક્રતું પશ્યતિ વીતશોકો ધાતુઃ પ્રસાદાન્મહિમાનમીશમ્ ॥ ૧॥
સપ્ત પ્રાણા પ્રભવન્તિ તસ્માત્ સપ્તાર્ચિષઃ સમિધઃ સપ્ત જિહ્વાઃ ।
સપ્ત ઇમે લોકા યેષુ ચરન્તિ પ્રાણા ગુહાશયાન્નિહિતાઃ સપ્ત સપ્ત ॥ ૨॥
અતઃ સમુદ્રા ગિરયશ્ચ સર્વેઽસ્માત્સ્યન્દન્તે સિન્ધવઃ સર્વરૂપાઃ ।
અતશ્ચ વિશ્વા ઓષધયો રસાશ્ચ યેનૈષ ભૂતસ્તિષ્ઠત્યન્તરાત્મા ॥ ૩॥
બ્રહ્મા દેવાનાં પદવીઃ કવીનામૃષિર્વિપ્રાણાં મહિષો મૃગાણામ્ ।
શ્યેનો ગૃધ્રાણાꣳ સ્વધિતિર્વનાનાꣳ સોમઃ પવિત્રમત્યેતિ રેભન્ ॥ ૪॥
અજામેકાં લોહિતશુક્લકૃષ્ણાં બહ્વીં પ્રજાં જનયન્તીꣳ સરૂપામ્ ।
અજો હ્યેકો જુષમાણોઽનુશેતે જહાત્યેનાં ભુક્તભોગામજોઽન્યઃ ॥ ૫॥
હંસઃ શુચિષદ્વસુરન્તરિક્ષસદ્ધોતા વેદિષદતિથિર્દુરોણસત્ ।
નૃષદ્વરસદૃતસદ્વ્યોમસદબ્જા ગોજા ઋતજા અદ્રિજા ઋતં બૃહત્ ॥ ૬॥
યસ્માજ્જાતા ન પરા નૈવ કિઞ્ચનાસ ય આવિવેશ ભુવનાનિ વિશ્વા ।
પ્રજાપતિઃ પ્રજયા સંવિદાનસ્ત્રીણિ જ્યોતીꣳષિ સચતે સ ષોઽશી ॥ ૬ ક॥
વિધર્તારꣳ હવામહે વસોઃ કુવિદ્વનાતિ નઃ ।
સવિતારં નૃચક્ષસમ્ ॥ ૬ ખ॥
ઘૃતં મિમિક્ષિરે ઘૃતમસ્ય યોનિર્ઘૃતે શ્રિતો ઘૃતમુવસ્ય ધામ ।
અનુષ્વધમાવહ માદયસ્વ સ્વાહાકૃતં વૃષભ વક્ષિ હવ્યમ્ ॥ ૭॥
સમુદ્રાદૂર્મિર્મધુમાꣳ ઉદારદુપાꣳ શુના સમમૃતત્વમાનટ્ ।
ઘૃતસ્ય નામ ગુહ્યં યદસ્તિ જિહ્વા દેવાનામમૃતસ્ય નાભિઃ ॥ ૮॥
વયં નામ પ્રબ્રવામા ઘૃતેનાસ્મિન્ યજ્ઞે ધારયામા નમોભિઃ ।
ઉપ બ્રહ્મા શ‍ૃણવચ્છસ્યમાન ચતુઃશ‍ૃઙ્ગોઽવમીદ્ગૌર એતત્ ॥ ૯॥

ચત્વારિ શૃઙ્ગા ત્રયો અસ્ય પાદા દ્વેશીર્ષે સપ્ત હસ્તાસો અસ્ય ।
ત્રિધા બદ્ધો વૃષભો રોરવીતિ મહો દેવો મર્ત્યાઁ આવિવેશ ॥ ૧૦॥
ત્રિધા હિતં પણિભિર્ગુહ્યમાનં ગવિ દેવાસો ઘૃતમન્વવિન્દન્ ।
ઇન્દ્ર એકઁ સૂર્ય એકં જજાન વેનાદેકઁ સ્વધયા નિષ્ટતક્ષુઃ ॥ ૧૧॥
યો દેવાનાં પ્રથમં પુરસ્તાદ્વિશ્વાધિકો રુદ્રો મહર્ષિઃ ।
હિરણ્યગર્ભં પશ્યત જાયમાનઁ સ નો દેવઃ
શુભયાસ્મૃત્યા સંયુનક્તુ ॥ ૧૨॥
યસ્માત્પરં નાપરમસ્તિ કિઞ્ચિત્
યસ્માન્નાણીયો ન જ્યાયોઽસ્તિ કશ્ચિત્ ।
વૃક્ષ ઇવ સ્તબ્ધો દિવિ તિષ્ઠત્યેકસ્તેનેદં પૂર્ણં પુરુષેણ સર્વમ્ ॥ ૧૩॥
ન કર્મણા ન પ્રજયા ધનેન ત્યાગેનૈકે અમૃતત્વમાનશુઃ ।
પરેણ નાકં નિહિતં ગુહાયાં બિભ્રાજતે યદ્યતયો વિશન્તિ ॥ ૧૪॥
વેદાન્તવિજ્ઞાનવિનિશ્ચિતાર્થાઃ સંન્યાસયોગાદ્યતયઃ શુદ્ધસત્ત્વાઃ ।
તે બ્રહ્મલોકે તુ પરાન્તકાલે પરામૃતાઃ(ત્) પરિમુચ્યન્તિ સર્વે ॥ ૧૫॥
દહ્રં વિપાપં પરમેઽશ્મભૂતં યત્ પુણ્ડરીકં પુરમધ્યસઁ સ્થમ્ । (વરવેઽશ્મભૂતં)
તત્રાપિ દહ્રે ગગનં વિશોકં તસ્મિન્ યદન્તસ્તદુપાસિતવ્યમ્ ॥ ૧૬॥
યો વેદાદૌ સ્વરઃ પ્રોક્તો વેદાન્તે ચ પ્રતિષ્ઠિતઃ ।
તસ્ય પ્રકૃતિલીનસ્ય યઃ પરઃ સ મહેશ્વરઃ ॥ ૧૭॥

ત્રયોદશોઽનુવાકઃ ।

સહસ્રશીર્ષં દેવં વિશ્વાક્ષં વિશ્વશમ્ભુવમ્ ।
વિશ્વં નારાયણં દેવમક્ષરં પરમં પ્રભુમ્ ॥ ૧॥
વિશ્વતઃ પરમં નિત્યં વિશ્વં નારાયણઁ હરિમ્ ।
વિશ્વમેવેદં પુરુષસ્તદ્વિશ્વમુપજીવતિ ॥ ૨॥
પતિં વિશ્વસ્યાત્મેશ્વરઁ શાશ્વતઁ શિવમચ્યુતમ્ ।
નારાયણં મહાજ્ઞેયં વિશ્વાત્માનં પરાયણમ્ ॥ ૩॥

નારાયણઃ પરં બ્રહ્મ તત્ત્વં નારાયણઃ પરઃ ।
નારાયણઃ પરો જ્યોતિરાત્મા નારાયણઃ પરઃ ॥ ૪॥
નારાયણઃ પરો ધ્યાતા ધ્યાનં નારાયણઃ પરઃ ।
યચ્ચ કિઞ્ચિજ્જગત્યસ્મિન્ દૃશ્યતે શ્રૂયતેઽપિ વા ।
અન્તર્બહિશ્ચ તત્સર્વં વ્યાપ્ય નારાયણઃ સ્થિતઃ ॥ ૫॥
અનન્તમવ્યયં કવિꣳ સમુદ્રેઽન્તં વિશ્વશમ્ભુવમ્ ।
પદ્મકોશપ્રતીકાશꣳ હૃદયં ચાપ્યધોમુખમ્ ॥ ૬॥
અધો નિષ્ટ્યા વિતસ્ત્યાન્તે નાભ્યામુપરિ તિષ્ઠતિ ।
હૃદયં તદ્વિજાનીયાદ્વિશ્વસ્યાયતનં મહત્ ॥ ૭॥
સન્તતꣳ સિરાભિસ્તુ લમ્બત્યાકોશસન્નિભમ્ ।
તસ્યાન્તે સુષિરꣳ સૂક્ષ્મં તસ્મિન્ત્સર્વં પ્રતિષ્ઠિતમ્ ॥ ૮॥
તસ્ય મધ્યે મહાનગ્નિર્વિશ્વાર્ચિર્વિશ્વતોમુખઃ ।
સોઽગ્રભુગ્વિભજન્તિષ્ઠન્નાહારમજરઃ કવિઃ ॥ ૯॥
તિર્યગૂર્ધ્વમધઃશાયી રશ્મયસ્તસ્ય સન્તતા(ઃ) ।
સન્તાપયતિ સ્વં દેહમાપાદતલમસ્તકમ્ ।
તસ્ય મધ્યે વહ્નિશિખા અણીયોર્ધ્વા વ્યવસ્થિતા ॥ ૧૦॥
નીલતોયદમધ્યસ્થા વિદ્યુલ્લેખેવ ભાસ્વરા ।
નીવારશૂકવત્તન્વી પીતા ભાસ્વત્યણૂપમા ॥ ૧૧॥
તસ્યાઃ શિખાયા મધ્યે પરમાત્મા વ્યવસ્થિતઃ ।
સ બ્રહ્મ સ શિવઃ સ હરિઃ સેન્દ્રઃ સોઽક્ષરઃ પરમઃ સ્વરાટ્ ॥ ૧૨॥ (બ્રહ્મા)

ચતુર્દશોઽનુવાકઃ ।

આદિત્યો વા એષ એતન્મણ્ડલં તપતિ તત્ર તા ઋચસ્તદૃચા મણ્ડલꣳ
સ ઋચાં લોકોઽથ ય એષ એતસ્મિન્મણ્ડલેઽર્ચિર્દીપ્યતે તાનિ સામાનિ સ
સામ્નાં લોકોઽથ ય એષ એતસ્મિન્મણ્ડલેઽર્ચિષિ પુરુષસ્તાનિ
યજૂꣳષિ સ યજુષા મણ્ડલꣳ સ યજુષાં લોકઃ સૈષા ત્રય્યેવ
વિદ્યા તપતિ ય એષોઽન્તરાદિત્યે હિરણ્મયઃ પુરુષઃ ॥ ૧॥

પઞ્ચદશોઽનુવાકઃ ।

આદિત્યો વૈ તેજ ઓજો બલં યશશ્ચક્ષુઃ શ્રોત્રમાત્મા મનો મન્યુર્મનુર્મૃત્યુઃ
સત્યો મિત્રો વાયુરાકાશઃ પ્રાણો લોકપાલઃ કઃ કિં કં તત્સત્યમન્નમમૃતો
જીવો વિશ્વઃ કતમઃ સ્વયમ્ભુ બ્રહ્મૈતદમૃત એષ પુરુષ એષ
ભૂતાનામધિપતિર્બ્રહ્મણઃ સાયુજ્યꣳ સલોકતામાપ્નોત્યેતાસામેવ
દેવતાનાꣳ સાયુજ્યꣳ સાર્ષ્ટિતાꣳ સમાનલોકતામાપ્નોતિ ય એવં
વેદેત્યુપનિષત્ ॥ ૧॥

ઘૃણિઃ સૂર્ય આદિત્યોમર્ચયન્તિ તપઃ સત્યં મધુ ક્ષરન્તિ તદ્બ્રહ્મ તદાપ
આપો જ્યોતી રસોઽમૃતં બ્રહ્મ ભૂર્ભુવઃ સુવરોમ્ ॥ ૨॥

ષોડશોઽનુવાકઃ ।

નિધનપતયે નમઃ । નિધનપતાન્તિકાય નમઃ ।
ઊર્ધ્વાય નમઃ । ઊર્ધ્વલિઙ્ગાય નમઃ ।
હિરણ્યાય નમઃ । હિરણ્યલિઙ્ગાય નમઃ ।
સુવર્ણાય નમઃ । સુવર્ણલિઙ્ગાય નમઃ ।
દિવ્યાય નમઃ । દિવ્યલિઙ્ગાય નમઃ ।
ભવાય નમઃ । ભવલિઙ્ગાય નમઃ ।
શર્વાય નમઃ । શર્વલિઙ્ગાય નમઃ ।
શિવાય નમઃ । શિવલિઙ્ગાય નમઃ ।
જ્વલાય નમઃ । જ્વલલિઙ્ગાય નમઃ ।
આત્માય નમઃ । આત્મલિઙ્ગાય નમઃ ।
પરમાય નમઃ । પરમલિઙ્ગાય નમઃ ।
એતત્સોમસ્ય સૂર્યસ્ય સર્વલિઙ્ગꣳ
સ્થાપયતિ પાણિમન્ત્રં પવિત્રમ્ ॥ ૧॥

સપ્તદશોઽનુવાકઃ ।

સદ્યોજાતં પ્રપદ્યામિ સદ્યોજાતાય વૈ નમો નમઃ ।
ભવે ભવે નાતિભવે ભવસ્વ મામ્ । ભવોદ્ભવાય નમઃ ॥ ૧॥

અષ્ટાદશોઽનુવાકઃ ।

વામદેવાય નમો જ્યેષ્ઠાય નમઃ શ્રેષ્ઠાય નમો રુદ્રાય

નમઃ કાલાય નમઃ કલવિકરણાય નમો બલવિકરણાય નમો
બલાય નમો બલપ્રમથનાય નમઃ સર્વભૂતદમનાય નમો
મનોન્મનાય નમઃ ॥ ૧॥

એકોનવિંશોઽનુવાકઃ ।

અઘોરેભ્યોઽથ ઘોરેભ્યો ઘોરઘોરતરેભ્યઃ ।
સર્વતઃ શર્વ સર્વેભ્યો નમસ્તે અસ્તુ રુદ્રરૂપેભ્યઃ ॥ ૧॥

વિંશોઽનુવાકઃ ।

તત્પુરુષાય વિદ્મહે મહાદેવાય ધીમહિ । તન્નો રુદ્રઃ પ્રચોદયાત્ ॥ ૧॥

એકવિંશોઽનુવાકઃ ।

ઈશાનઃ સર્વવિદ્યાનામીશ્વરઃ સર્વભૂતાનાં
બ્રહ્માધિપતિર્બ્રહ્મણોઽધિપતિર્બ્રહ્મા શિવો મે અસ્તુ સદાશિવોમ્ ॥ ૧॥

દ્વાવિંશોઽનુવાકઃ ।

નમો હિરણ્યબાહવે હિરણ્યવર્ણાય હિરણ્યરૂપાય હિરણ્યપતયે ।
અમ્બિકાપતય ઉમાપતયે પશુપતયે નમો નમઃ ॥ ૧॥

ત્રયોવિંશોઽનુવાકઃ ।

ઋતꣳ સત્યં પરં બ્રહ્મ પુરુષં કૃષ્ણપિઙ્ગલમ્ ।
ઊર્ધ્વરેતં વિરૂપાક્ષં વિશ્વરૂપાય વૈ નમો નમઃ ॥ ૧॥

ચતુર્વિંશોઽનુવાકઃ ।

સર્વો વૈ રુદ્રસ્તસ્મૈ રુદ્રાય નમો અસ્તુ । પુરુષો વૈ રુદ્રઃ
સન્મહો નમો નમઃ ।
વિશ્વં ભૂતં ભુવનં ચિત્રં બહુધા જાતં જાયમાનં ચ યત્ ।
સર્વો હ્યેષ રુદ્રસ્તસ્મૈ રુદ્રાય નમો અસ્તુ ॥ ૧॥

પઞ્ચવિંશોઽનુવાકઃ ।

કદ્રુદ્રાય પ્રચેતસે મીઢુષ્ટમાય તવ્યસે । વોચેમ શન્તમꣳ હૃદે ।
સર્વોહ્યેષ રુદ્રસ્તસ્મૈ રુદ્રાય નમો અસ્તુ ॥ ૧॥

ષડ્વિંશોઽનુવાકઃ ।

યસ્ય વૈકઙ્કત્યગ્નિહોત્રહવણી ભવતિ પ્રત્યેવાસ્યાહુતયસ્તિષ્ઠત્યથો
પ્રતિષ્ઠિત્યૈ ॥ ૧॥

સપ્તવિંશોઽનુવાકઃ ।

કૃણુષ્વ પાજ ઇતિ પઞ્ચ ।
કૃણુષ્વ પાજઃ પ્રસિતિં ન પૃથ્વીં યાહિ રાજેવામવાઁ ઇભેન ।
તૃષ્વીમનુ પ્રસિતિં દ્રૂણાનોઽસ્તાસિ વિધ્ય રક્ષસસ્તપિષ્ઠૈઃ ॥ ૧॥
તવ ભ્રમાસ આશુયા પતન્ત્યનુ સ્પૃશ ધૃષતા શોશુચાનઃ ।
તપૂંષ્યગ્ને જુહ્વા પતઙ્ગાનસન્દિતો વિ સૃજ વિશ્વગુલ્કાઃ ॥ ૨॥
પ્રતિ સ્પશો વિસૃજ તૂર્ણિતમો ભવા પાયુર્વિશો અસ્યા અદબ્ધઃ ।
યો નો દૂરે અઘશંસો યો અન્ત્યગ્ને માકિષ્ટે વ્યથિરાદધર્ષીત્ ॥ ૩॥
ઉદગ્ને તિષ્ઠ પ્રત્યા તનુષ્વ ન્યમિત્રાઁ ઓષતાત્તિગ્મહેતે ।
યો નો અરાતિં સમિધાન ચક્રે નીચાતં ધક્ષ્યતસં ન શુષ્કમ્ ॥ ૪॥
ઊર્ધ્વો ભવ પ્રતિં વિધ્યાધ્યસ્મદાવિષ્કૃણુષ્વ દૈવ્યાન્યગ્ને ।
અવસ્થિરા તનુહિ યાતુજૂનાં જામિમજામિં પ્રમૃણીહિ શત્રૂન્ ॥ ૫॥

અષ્ટાવિંશોઽનુવાકઃ ।

અદિતિર્દેવા ગન્ધર્વા મનુષ્યાઃ પિતરોઽસુરાસ્તેષાꣳ
સર્વભૂતાનાં માતા મેદિની મહતી મહી સાવિત્રી ગાયત્રી
જગત્યુર્વી પૃથ્વી બહુલા વિશ્વા ભૂતા કતમા કાયા સા
સત્યેત્યમૃતેતિ વાસિષ્ઠઃ ॥ ૧॥

એકોનત્રિંશોઽનુવાકઃ ।

આપો વા ઇદꣳ સર્વં વિશ્વા ભૂતાન્યાપઃ પ્રાણા વા આપઃ
પશવ આપોઽન્નમાપોઽમૃતમાપઃ સમ્રાડાપો વિરાડાપઃ
સ્વરાડાપશ્છન્દાꣳસ્યાપો જ્યોતીꣳષ્યાપો યજૂꣳષ્યાપઃ
સત્યમાપઃ સર્વા દેવતા આપો ભૂર્ભુવઃ સુવરાપ ઓમ્ ॥ ૧॥

ત્રિંશોઽનુવાકઃ ।

આપઃ પુનન્તુ પૃથિવીં પૃથિવી પૂતા પુનાતુ મામ્ ।
પુનન્તુ બ્રહ્મણસ્પતિર્બ્રહ્મપૂતા પુનાતુ મામ્ ॥ ૧॥
યદુચ્છિષ્ટમભોજ્યં યદ્વા દુશ્ચરિતં મમ ।
સર્વં પુનન્તુ મામાપોઽસતાં ચ પ્રતિગ્રહꣳ સ્વાહા ॥ ૨॥

એકત્રિંશોઽનુવાકઃ ।

અગ્નિશ્ચ મા મન્યુશ્ચ મન્યુપતયશ્ચ મન્યુકૃતેભ્યઃ ।
પાપેભ્યો રક્ષન્તામ્ । યદહ્ના પાપમકાર્ષમ્ ।
મનસા વાચા હસ્તાભ્યામ્ । પદ્ભ્યામુદરેણ શિશ્ના ।
અહસ્તદવલુમ્પતુ । યત્કિઞ્ચ દુરિતં મયિ । ઇદમહં
મામમૃતયોનૌ । સત્યે જ્યોતિષિ જુહોમિ સ્વાહા ॥ ૧॥

દ્વાત્રિંશોઽનુવાકઃ ।

સૂર્યશ્ચ મા મન્યુશ્ચ મન્યુપતયશ્ચ મન્યુકૃતેભ્યઃ ।
પાપેભ્યો રક્ષન્તામ્ । યદ્રાત્રિયા પાપમકાર્ષમ્ ।
મનસા વાચા હસ્તાભ્યામ્ । પદ્ભ્યામુદરેણ શિશ્ના । રાત્રિસ્તદવલુમ્પતુ ।
યત્કિઞ્ચ દુરિતં મયિ । ઇદમહં મામમૃતયોનૌ । સૂર્યે
જ્યોતિષિ જુહોમિ સ્વાહા ॥ ૧॥

ત્રયસ્ત્રિંશોઽનુવાકઃ ।

ઓમિત્યેકાક્ષરં બ્રહ્મ । અગ્નિર્દેવતા બ્રહ્મ ઇત્યાર્ષમ્ ।
ગાયત્રં છન્દં પરમાત્મં સરૂપમ્ । સાયુજ્યં વિનિયોગમ્ ॥ ૧॥

ચતુસ્ત્રિંશોઽનુવાકઃ ।

આયાતુ વરદા દેવી અક્ષરં બ્રહ્મ સંમિતમ્ ।
ગાયત્રી છન્દસાં માતેદં બ્રહ્મ જુષસ્વ નઃ ॥ ૧॥ (ગાયત્રઈ)
યદહ્નાત્કુરુતે પાપં તદહ્નાત્પ્રતિમુચ્યતે ।
યદ્રાત્રિયાત્કુરુતે પાપં તદ્રાત્રિયાત્પ્રતિમુચ્યતે ।
સર્વવર્ણે મહાદેવિ સન્ધ્યાવિદ્યે સરસ્વતિ ॥ ૨॥

પઞ્ચત્રિંશોઽનુવાકઃ ।

ઓજોઽસિ સહોઽસિ બલમસિ ભ્રાજોઽસિ દેવાનાં ધામનામાસિ વિશ્વમાસિ
વિશ્વાયુઃ સર્વમસિ સર્વાયુરભિભૂરોં ગાયત્રીમાવાહયામિ
સાવિત્રીમાવાહયામિ સરસ્વતીમાવાહયામિ છન્દર્ષીનાવાહયામિ
શ્રિયમાવાહયામિ ગાયત્રિયા ગાયત્રી છન્દો વિશ્વામિત્ર ઋષિઃ
સવિતા દેવતાગ્નિર્મુખં બ્રહ્મા શિરો વિષ્ણુર્હૃદયꣳ રુદ્રઃ શિખા
પૃથિવી યોનિઃ પ્રાણાપાનવ્યાનોદાનસમાના સપ્રાણા શ્વેતવર્ણા
સાઙ્ખ્યાયનસગોત્રા ગાયત્રી ચતુર્વિંશત્યક્ષરા ત્રિપદા ષટ્કુક્ષિઃ
પઞ્ચશીર્ષોપનયને વિનિયોગઃ ॥ ૧॥

ૐ ભૂઃ । ૐ ભુવઃ । ઓꣳ સુવઃ । ૐ મહઃ । ૐ જનઃ । ૐ તપઃ ।
ઓꣳ સત્યમ્ । ૐ તત્સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય ધીમહિ ।
ધિયો યો નઃ પ્રચોદયાત્ । ઓમાપો જ્યોતી રસોઽમૃતં બ્રહ્મ
ભૂર્ભુવઃ સુવરોમ્ ॥ ૨॥

ષટ્ત્રિંશોઽનુવાકઃ ।

ઉત્તમે શિખરે દેવિ જાતે ભૂમ્યાં પર્વતમૂર્ધનિ ।
બ્રાહ્મણેભ્યોઽભ્યનુજ્ઞાતા ગચ્છ દેવિ યથાસુખમ્ ॥ ૧॥

સ્તુતો મયા વરદા વેદમાતા
પ્રચોદયન્તાં પવને દ્વિજાતા ।
આયુઃ પ્રાણં પ્રજાં પશું કીર્તિં દ્રવિણં
બ્રહ્મવર્ચસં મહ્યં દત્વા વ્રજત બ્રહ્મલોકમ્ ॥ ૨॥

સપ્તત્રિંશોઽનુવાકઃ ।

ઘૃણિઃ સૂર્ય આદિત્યો ન પ્રભા વાત્યક્ષરમ્ । મધુ ક્ષરન્તિ તદ્રસમ્ ।
સત્યં વૈ તદ્રસમાપો જ્યોતી રસોઽમૃતં બ્રહ્મ ભૂર્ભુવઃ સુવરોમ્ ॥ ૧॥

ત્રિસુપર્ણમન્ત્રઃ ૧

અષ્ટત્રિંશોઽનુવાકઃ ।

બ્રહ્મમેતુ મામ્ । મધુમેતુ મામ્ । બ્રહ્મમેવ મધુમેતુ મામ્ ।
યાસ્તે સોમ પ્રજા વત્સોઽભિ સો અહમ્ । દુઃષ્વપ્નહન્ દુરુષ્ષહ ।
યાસ્તે સોમ પ્રાણાꣳ સ્તાઞ્જુહોમિ ॥ ૧॥

ત્રિસુપર્ણમયાચિતં બ્રાહ્મણાય દદ્યાત્ । બ્રહ્મહત્યાં વા એતે ઘ્નન્તિ ।
યે બ્રાહ્મણાસ્ત્રિસુપર્ણં પઠન્તિ । તે સોમં પ્રાપ્નુવન્તિ । આ
સહસ્રાત્ પઙ્ક્તિં પુનન્તિ । ૐ ॥ ૨॥

ત્રિસુપર્ણમન્ત્રઃ ૨

એકોનચત્વારિંશોઽનુવાકઃ ।

બ્રહ્મ મેધયા । મધુ મેધયા । બ્રહ્મમેવ મધુ મેધયા ॥ ૧॥
અદ્યાનો દેવ સવિતઃ પ્રજાવત્સાવીઃ સૌભગમ્ ।
પરા દુઃષ્વપ્નિય સુવ ॥ ૨॥
વિશ્વાનિ દેવ સવિતર્દુરિતાનિ પરાસુવ । યદ્ભદ્રં તન્મ આસુવ ॥ ૩॥
મધુવાતા ઋતાયતે મધુક્ષરન્તિ સિન્ધવઃ । માધ્વીર્નઃ સન્ત્વોષધીઃ ॥ ૪॥
મધુ નક્તમુતોષસિ મધુમત્પાર્થિવ રજઃ । મધુદ્યૌરસ્તુ નઃ પિતા ॥ ૫॥
મધુમાન્નો વનસ્પતિર્મધુમા અસ્તુ સૂર્યઃ । માધ્વીર્ગાવો ભવન્તુ નઃ ॥ ૬॥
ય ઇમં ત્રિસુપર્ણમયાચિતં બ્રાહ્મણાય દદ્યાત્ ।
ભ્રૂણહત્યાં વા એતે ઘ્નન્તિ ।
યે બ્રાહ્મણાસ્ત્રિસુપર્ણં પઠન્તિ । તે સોમં પ્રાપ્નુવન્તિ ।
આસહસ્રાત્પઙ્ક્તિં પુનન્તિ । ૐ ॥ ૭॥

ત્રિસુપર્ણમન્ત્રઃ ૩

ચત્વારિંશોઽનુવાકઃ ।

બ્રહ્મ મેધવા । મધુ મેધવા । બ્રહ્મમેવ મધુ મેધવા ॥ ૧॥
બ્રહ્મા દેવાનાં પદવીઃ કવીનામૃષિર્વિપ્રાણાં મહિષો મૃગાણામ્ ।
શ્યેનો ગૃદ્ધ્રાણા સ્વધિતિર્વનાના સોમઃ પવિત્રમત્યેતિ રેભન્ ॥ ૨॥
હ સઃ શુચિષદ્વસુરન્તરિક્ષસદ્ધોતા વેદિષદતિથિર્દુરોણસત્ ।
નૃષદ્વરસદૃતસદ્વ્યોમસદબ્જા ગોજા ઋતજા અદ્રિજા ઋતં બૃહત્ ॥ ૩॥
ઋચે ત્વા ઋચે ત્વા સમિત્સ્રવન્તિ સરિતો ન ધેનાઃ ।
અન્તર્હૃદા મનસા પૂયમાનાઃ । ઘૃતસ્ય ધારા અભિચાકશીમિ ॥ ૪॥

હિરણ્યયો વેતસો મધ્ય આસામ્ । તસ્મિન્ત્સુપર્ણો મધુકૃત્ કુલાયી ભજન્નાસ્તે
મધુ દેવતાભ્યઃ । તસ્યાસતે હરયઃ સપ્ત તીરે સ્વધાં
દુહાના અમૃતસ્ય ધારામ્ ॥ ૫॥

ય ઇદં ત્રિસુપર્ણમયાચિતં બ્રાહ્મણાય દદ્યાત્ ।
વીરહત્યાં વા એતે ઘ્નન્તિ ।
યે બ્રાહ્મણાસ્ત્રિસુપર્ણં પઠન્તિ । તે સોમં પ્રાપ્નુવન્તિ ।
આસહસ્રાત્ પઙ્ક્તિં પુનન્તિ । ૐ ॥ ૬॥

એકચત્વારિંશોઽનુવાકઃ ।

મેધાદેવી જુષમાણા ન આગાદ્વિશ્વાચી ભદ્રા સુમનસ્યમાના ।
ત્વયા જુષ્ટા જુષમાણા દુરુક્તાન્બૃહદ્વદેમ વિદથે સુવીરાઃ ॥ ૧॥
ત્વયા જુષ્ટ ઋષિર્ભવતિ દેવિ ત્વયા બ્રહ્માગતશ્રીરુત ત્વયા ।
ત્વયા જુષ્ટશ્ચિત્રં વિન્દતે વસુ સા નો જુષસ્વ દ્રવિણેન મેધે ॥ ૨॥

દ્વિચત્વારિંશોઽનુવાકઃ ।

મેધાં મ ઇન્દ્રો દદાતુ મેધાં દેવી સરસ્વતી ।
મેધાં મે અશ્વિનાવુભાવાધત્તાં પુષ્કરસ્રજૌ ॥ ૧॥
અપ્સરાસુ ચ યા મેધા ગન્ધર્વેષુ ચ યન્મનઃ ।
દૈવી મેધા સરસ્વતી સ માં મેધા સુરભિર્જુષતાꣳ સ્વાહા ॥ ૨॥

ત્રિચત્વારિંશોઽનુવાકઃ ।

આ માં મેધા સુરભિર્વિશ્વરૂપા હિરણ્યવર્ણા જગતી જગમ્યા ।
ઊર્જસ્વતી પયસા પિન્વમાના સા માં મેધા સુપ્રતીકા જુષતામ્ ॥ ૧॥

ચતુશ્ચત્વારિંશોઽનુવાકઃ ।

મયિ મેધાં મયિ પ્રજાં મય્યગ્નિસ્તેજો દધાતુ ।
મયિ મેધાં મયિ પ્રજાં મયીન્દ્ર ઇન્દ્રિયં દધાતુ ।
મયિ મેધાં મયિ પ્રજાં મયિ સૂર્યો ભ્રાજો દધાતુ ॥ ૧॥

પઞ્ચચત્વારિંશોઽનુવાકઃ ।

અપૈતુ મૃત્યુરમૃતં ન આગન્વૈવસ્વતો નો અભયં કૃણોતુ ।

પર્ણં વનસ્પતેરિવાભિ નઃ શીયતા ँ રયિઃ સચતાં નઃ શચીપતિઃ ॥ ૧॥

ષટ્ચત્વારિંશોઽનુવાકઃ ।

પરં મૃત્યો અનુપરેહિ પન્થાં યસ્તે સ્વ ઇતરો દેવયાનાત્ ।
ચક્ષુષ્મતે શૃણ્વતે તે બ્રવીમિ મા નઃ પ્રજા ँ રીરિષો મોત વીરાન્ ॥ ૧॥

સપ્તચત્વારિંશોઽનુવાકઃ ।

વાતં પ્રાણં મનસાન્વારભામહે પ્રજાપતિં યો ભુવનસ્ય ગોપાઃ ।
સ નો મૃત્યોસ્ત્રાયતાં પાત્વ ँ હસો જ્યોગ્જીવા જરામશીમહિ ॥ ૧॥

અષ્ટચત્વારિંશોઽનુવાકઃ ।

અમુત્રભૂયાદધ યદ્યમસ્ય બૃહસ્પતે અભિશસ્તેરમુઞ્ચઃ ।
પ્રત્યૌહતામશ્વિના મૃત્યુમસ્મદ્દેવાનામગ્ને ભિષજા શચીભિઃ ॥ ૧॥

એકોનપઞ્ચાશોઽનુવાકઃ ।

હરિ ँ હરન્તમનુયન્તિ દેવા વિશ્વસ્યેશાનં વૃષભં મતીનામ્ ।
બ્રહ્મસરૂપમનુ મેદમાગાદયનં મા વિવધીર્વિક્રમસ્વ ॥ ૧॥

પઞ્ચાશોઽનુવાકઃ ।

શલ્કૈરગ્નિમિન્ધાન ઉભૌ લોકૌ સનેમહમ્ ।
ઉભયોર્લોકયોરૃધ્વાતિ મૃત્યું તરામ્યહમ્ ॥ ૧॥

એકપઞ્ચાશોઽનુવાકઃ ।

મા છિદો મૃત્યો મા વધીર્મા મે બલં વિવૃહો મા પ્રમોષીઃ ।
પ્રજાં મા મે રીરિષ આયુરુગ્ર નૃચક્ષસં ત્વા હવિષા વિધેમ ॥ ૧॥

દ્વિપઞ્ચાશોઽનુવાકઃ ।

મા નો મહાન્તમુત મા નો અર્ભકં
મા ન ઉક્ષન્તમુત મા ન ઉક્ષિતમ્ ।
મા નો વધીઃ પિતરં મોત માતરં પ્રિયા મા નસ્તનુવો રુદ્ર રીરિષઃ ॥ ૧॥

ત્રિપઞ્ચાશોઽનુવાકઃ ।

મા નસ્તોકે તનયે મા ન આયુષિ

મા નો॒ ગોષુ॒ મા નો॒ અશ્વે॑ષુ રીરિષઃ ।
વી॒રાન્મા નો॑ રુદ્ર ભામિ॒તો વ॑ધી-
ર્હ॒વિષ્મ॑ન્તો॒ નમ॑સા વિધેમ તે ॥ ૧॥

ચતુષ્પઞ્ચાશોઽનુવાકઃ ।

પ્ર॑જાપ॒તે ન ત્વદે॒તાન્ય॒ન્યો વિશ્વા॑ જા॒તાનિ॒ પરિ॒ તા બ॒ભૂવ ।
યત્કા॑મસ્તે જુહુ॒મસ્તન્નો॑ અસ્તુ વ॒ય ँ સ્યા॑મ॒ પત॑યો ર॒યીણામ્ ॥ ૧॥

પઞ્ચપઞ્ચાશોઽનુવાકઃ ।

સ્વ॒સ્તિ॒દા વિ॒શસ્પતિ॑ર્વૃત્ર॒હા વિમૃધો॑ વ॒શી ।
વૃષેન્દ્રઃ॑ પુ॒ર એ॑તુ નઃ સ્વસ્તિ॒દા અ॑ભયઙ્ક॒રઃ ॥ ૧॥

ષટ્પઞ્ચાશોઽનુવાકઃ ।

ત્ર્ય॑મ્બકં યજામહે સુ॒ગન્ધિં॑ પુ॒ષ્ટિવ॑ર્ધનમ્ ।
ઉ॒ર્વા॒રુ॒કમિ॑વ॒ બન્ધ॑ના॒ન્મૃત્યો॑ર્મુક્ષીય॒ મામૃતા᳚ત્ ॥ ૧॥

સપ્તપઞ્ચાશોઽનુવાકઃ ।

યે તે॑ સ॒હસ્ર॑મ॒યુતં॒ પાશા॒ મૃત્યો॒ મર્ત્યા॑ય॒ હન્ત॑વે ।
તાન્ ય॒જ્ઞસ્ય॑ મા॒યયા॒ સર્વા॒નવ॑યજામહે ॥ ૧॥

અષ્ટપઞ્ચાશોઽનુવાકઃ ।

મૃ॒ત્યવે॒ સ્વાહા॑ મૃ॒ત્યવે॒ સ્વાહા᳚ ॥ ૧॥

એકોનષષ્ટિતમોઽનુવાકઃ ।

દે॒વકૃ॑ત॒સ્યૈન॑સોઽવ॒યજ॑નમસિ॒ સ્વાહા᳚ ।
મ॒નુ॒ષ્ય॑કૃત॒સ્યૈન॑સોઽવ॒યજ॑નમસિ॒ સ્વાહા᳚ ।
પિ॒તૃકૃ॑ત॒સ્યૈન॑સોઽવ॒યજ॑નમસિ॒ સ્વાહા᳚ ।
આ॒ત્મકૃ॑ત॒સ્યૈન॑સોઽવ॒યજ॑નમસિ॒ સ્વાહા᳚ ।
અ॒ન્યકૃ॑ત॒સ્યૈન॑સોઽવ॒યજ॑નમસિ॒ સ્વાહા᳚ ।
અ॒સ્મત્કૃ॑ત॒સ્યૈન॑સોઽવ॒યજ॑નમસિ॒ સ્વાહા᳚ ।
યદ્દિ॒વા ચ॒ નક્તં॒ ચૈન॑શ્ચકૃ॒મ ત॒સ્યાવ॑યજ॑નમસિ॒ સ્વાહા᳚ ।
યત્સ્વ॒પન્ત॑શ્ચ॒ જાગ્ર॑ત॒શ્ચૈન॑શ્ચકૃ॒મ ત॒સ્યાવ॑યજ॑નમસિ॒ સ્વાહા᳚ ।

યત્સુષુપ્તશ્ચ જાગ્રતશ્ચૈનશ્ચકૃમ તસ્યાવયજનમસિ સ્વાહા ।
યદ્વિદ્વાꣳ સશ્ચાવિદ્વાꣳ સશ્ચૈનશ્ચકૃમ તસ્યાવયજનમસિ સ્વાહા ।
એનસ એનસોઽવયજનમસિ સ્વાહા ॥ ૧॥

ષષ્ટિતમોઽનુવાકઃ ।

યદ્વો દેવાશ્ચકૃમ જિહ્વયાં ગુરુ
મનસો વા પ્રયુતી દેવહેડનમ્ ।
અરાવા યો નો અભિ દુચ્છુનાયતે
તસ્મિન્ તદેનો વસવો નિધેતન સ્વાહા ॥ ૧॥

એકષષ્ટિતમોઽનુવાકઃ ।

કામોઽકાર્ષીન્નમો નમઃ । કામોઽકાર્શીત્કામઃ કરોતિ નાહં કરોમિ કામઃ કર્તા
નાહં કર્તા કામઃ કારયિતા નાહં કારયિતા એષ તે કામ કામાય સ્વાહા ॥ ૧॥

દ્વિષષ્ટિતમોઽનુવાકઃ ।

મન્યુરકાર્ષીન્નમો નમઃ । મન્યુરકાર્ષીન્મન્યુઃ કરોતિ નાહં
કરોમિ મન્યુઃ કર્તા નાહં કર્તા
મન્યુઃ કારયિતા નાહં કારયિતા એષ તે મન્યો મન્યવે સ્વાહા ॥ ૧॥

ત્રિષષ્ટિતમોઽનુવાકઃ ।

તિલાઞ્જુહોમિ સરસાન્ સપિષ્ટાન્ ગન્ધાર મમ ચિત્તે રમન્તુ સ્વાહા ॥ ૧॥

ગાવો હિરણ્યં ધનમન્નપાનꣳ સર્વેષાꣳ શ્રિયૈ સ્વાહા ॥ ૨॥

શ્રિયં ચ લક્ષ્મીં ચ પુષ્ટિં ચ કીર્તિં ચાનૃણ્યતામ્ ।
બ્રાહ્મણ્યં બહુપુત્રતામ્ । શ્રદ્ધામેધે પ્રજાઃ સન્દદાતુ સ્વાહા ॥ ૩॥

ચતુઃષષ્ટિતમોઽનુવાકઃ ।

તિલાઃ કૃષ્ણાસ્તિલાઃ શ્વેતાસ્તિલાઃ સૌમ્યા વશાનુગાઃ ।
તિલાઃ પુનન્તુ મે પાપં યત્કિઞ્ચિદ્ દુરિતં મયિ સ્વાહા ॥ ૧॥

ચોરસ્યાન્નં નવશ્રાદ્ધં બ્રહ્મહા ગુરુતલ્પગઃ ।
ગોસ્તેયꣳ સુરાપાનં ભ્રૂણહત્યા તિલા શાન્તિꣳ શમયન્તુ સ્વાહા ॥ ૨॥

શ્રીશ્ચ લક્ષ્મીશ્ચ પુષ્ટીશ્ચ કીર્તિં ચાનૃણ્યતામ્ ।

બ્રહ્મણ્યં બહુપુત્રતામ્ । શ્રદ્ધામેધે પ્રજ્ઞા તુ જાતવેદઃ
સન્દદાતુ સ્વાહા ॥ ૩॥

પઞ્ચષષ્ટિતમોઽનુવાકઃ ।

પ્રાણાપાનવ્યાનોદાનસમાના મે શુધ્યન્તાં
જ્યોતિરહં વિરજા વિપાપ્મા ભૂયાસꣳ સ્વાહા ॥ ૧॥

વાઙ્મનશ્ચક્ષુઃશ્રોત્રજિહ્વાઘ્રાણરેતોબુદ્ધ્યાકૂતિઃસઙ્કલ્પા મે
શુધ્યન્તાં જ્યોતિરહં વિરજા વિપાપ્મા ભૂયાસꣳ સ્વાહા ॥ ૨॥

ત્વક્ચર્મમાંસરુધિરમેદોમજ્જાસ્નાયવોઽસ્થીનિ મે શુધ્યન્તાં
જ્યોતિરહં વિરજા વિપાપ્મા ભૂયાસꣳ સ્વાહા ॥ ૩॥

શિરઃપાણિપાદપાર્શ્વપૃષ્ઠોરૂદરજઙ્ઘાશિશ્નોપસ્થપાયવો મે
શુધ્યન્તાં જ્યોતિરહં વિરજા વિપાપ્મા ભૂયાસꣳ સ્વાહા ॥ ૪॥

ઉત્તિષ્ઠ પુરુષ હરિત પિઙ્ગલ લોહિતાક્ષિ દેહિ દેહિ
દદાપયિતા મે શુધ્યન્તાં જ્યોતિરહં વિરજા
વિપાપ્મા ભૂયાસꣳ સ્વાહા ॥ ૫॥

ષટ્ષષ્ટિતમોઽનુવાકઃ ।

પૃથિવ્યપ્તેજોવાયુરાકાશા મે શુધ્યન્તાં
જ્યોતિરહં વિરજા વિપાપ્મા ભૂયાસꣳ સ્વાહા ॥ ૧॥

શબ્દસ્પર્શરૂપરસગન્ધા મે શુધ્યન્તાં
જ્યોતિરહં વિરજા વિપાપ્મા ભૂયાસꣳ સ્વાહા ॥ ૨॥

મનોવાક્કાયકર્માણિ મે શુધ્યન્તાં
જ્યોતિરહં વિરજા વિપાપ્મા ભૂયાસꣳ સ્વાહા ॥ ૩॥

અવ્યક્તભાવૈરહઙ્કારૈર્ -
જ્યોતિરહં વિરજા વિપાપ્મા ભૂયાસꣳ સ્વાહા ॥ ૪॥

આત્મા મે શુધ્યન્તાં
જ્યોતિરહં વિરજા વિપાપ્મા ભૂયાસꣳ સ્વાહા ॥ ૫॥

અન્તરાત્મા મે શુધ્યન્તાં

જ્યોતિરહં વિરજા વિપાપ્મા ભૂયાસꣳ સ્વાહા ॥ ૬॥

પરમાત્મા મે શુધ્યન્તાં
જ્યોતિરહં વિરજા વિપાપ્મા ભૂયાસꣳ સ્વાહા ॥ ૭॥

ક્ષુધે સ્વાહા । ક્ષુત્પિપાસાય સ્વાહા । વિવિટ્ટ્યૈ સ્વાહા ।
ઋગ્વિધાનાય સ્વાહા । કષોત્કાય સ્વાહા । ૐ સ્વાહા ॥ ૮॥

ક્ષુત્પિપાસામલં જ્યેષ્ઠામલલક્ષ્મીર્નાશયામ્યહમ્ ।
અભૂતિમસમૃદ્ધિં ચ સર્વાન્નિર્ણુદ મે પાપ્માનꣳ સ્વાહા ॥ ૯॥

અન્નમયપ્રાણમયમનોમયવિજ્ઞાનમયમાનન્દમયમાત્મા મે
શુધ્યન્તાં જ્યોતિરહં વિરજા વિપાપ્મા ભૂયાસꣳ સ્વાહા ॥ ૧૦॥

સપ્તષષ્ટિતમોઽનુવાકઃ ।

અગ્નયે સ્વાહા । વિશ્વેભ્યો દેવેભ્ય સ્વાહા । ધ્રુવાય ભૂમાય
સ્વાહા । ધ્રુવક્ષિતયે સ્વાહા ।
અચ્યુતક્ષિતયે સ્વાહા । અગ્નયે સ્વિષ્ટકૃતે સ્વાહા ॥

ધર્માય સ્વાહા । અધર્માય સ્વાહા । અદ્ભ્યઃ સ્વાહા ।
ઓષધિવનસ્પતિભ્યઃ સ્વાહા । રક્ષોદેવજનેભ્યઃ સ્વાહા ।
ગૃહ્યાભ્યઃ સ્વાહા । અવસાનેભ્યઃ સ્વાહા । અવસાનપતિભ્યઃ
સ્વાહા । સર્વભૂતેભ્યઃ સ્વાહા । કામાય સ્વાહા । અન્તરિક્ષાય
સ્વાહા । યદેજતિ જગતિ યચ્ચ ચેષ્ટતિ નામ્નો ભાગોઽયં
નામ્ને સ્વાહા । પૃથિવ્યૈ સ્વાહા । અન્તરિક્ષાય સ્વાહા । દિવે
સ્વાહા । સૂર્યાય સ્વાહા । ચન્દ્રમસે સ્વાહા । નક્ષત્રેભ્યઃ
સ્વાહા । ઇન્દ્રાય સ્વાહા । બૃહસ્પતયે સ્વાહા । પ્રજાપતયે
સ્વાહા । બ્રહ્મણે સ્વાહા । સ્વધા પિતૃભ્યઃ સ્વાહા । નમો
રુદ્રાય પશુપતયે સ્વાહા । દેવેભ્યઃ સ્વાહા । પિતૃભ્યઃ
સ્વધાસ્તુ । ભૂતેભ્યો નમઃ । મનુષ્યેભ્યો હન્તા । પ્રજાપતયે
સ્વાહા । પરમેષ્ઠિને સ્વાહા ॥ ૧॥

યથા કૂપઃ શતધારઃ સહસ્રધારો અક્ષિતઃ ।

એવા મે અસ્તુ ધાન્ય઼ँ સહસ્રધારમક્ષિતમ્ ॥ ધનધાન્યૈ સ્વાહા ॥ ૨॥

યે ભૂતાઃ પ્રચરન્તિ દિવાનક્તં
બલિમિચ્છન્તો વિતુદસ્ય પ્રેષ્યાઃ ।
તેભ્યો બલિં પુષ્ટિકામો હરામિ
મયિ પુષ્ટિં પુષ્ટિપતિર્દધાતુ સ્વાહા ॥ ૩॥

અષ્ટષષ્ટિતમોઽનુવાકઃ ।

ૐ તદ્બ્રહ્મ । ૐ તદ્વાયુઃ । ૐ તદાત્મા । ૐ તત્સત્યમ્ ।
ૐ તત્સર્વમ્ । ૐ તત્પુરોર્નમઃ ॥ ૧॥

ૐ અન્તશ્ચરતિ ભૂતેષુ ગુહાયાં વિશ્વમૂર્તિષુ ।
ત્વં યજ્ઞસ્ત્વં વષટ્કારસ્ત્વમિન્દ્રસ્ત્વ઼ँ રુદ્રસ્ત્વં વિષ્ણુસ્ત્વં
બ્રહ્મ ત્વં પ્રજાપતિઃ । ત્વં તદાપ આપો જ્યોતી રસોઽમૃતં
બ્રહ્મ ભૂર્ભુવઃ સુવરોમ્ ॥ ૨॥

એકોનસપ્તતિતમોઽનુવાકઃ ।

શ્રદ્ધાયાં પ્રાણે નિવિષ્ટોઽમૃતં જુહોમિ ।
શ્રદ્ધાયામપાને નિવિષ્ટોઽમૃતં જુહોમિ ।
શ્રદ્ધાયાં વ્યાને નિવિષ્ટોઽમૃતં જુહોમિ ।
શ્રદ્ધાયામુદાને નિવિષ્ટોઽમૃતં જુહોમિ ।
શ્રદ્ધાયા઼ँ સમાને નિવિષ્ટોઽમૃતં જુહોમિ ।
બ્રહ્મણિ મ આત્મામૃતત્વાય ॥ ૧॥

અમૃતોપસ્તરણમસિ ॥ ૨॥

શ્રદ્ધાયાં પ્રાણે નિવિષ્ટોઽમૃતં જુહોમિ ।
શિવો મા વિશાપ્રદાહાય । પ્રાણાય સ્વાહા ॥
શ્રદ્ધાયામપાને નિવિષ્ટોઽમૃતં જુહોમિ ।
શિવો મા વિશાપ્રદાહાય । અપાનાય સ્વાહા ॥
શ્રદ્ધાયાં વ્યાને નિવિષ્ટોઽમૃતં જુહોમિ ।
શિવો મા વિશાપ્રદાહાય । વ્યાનાય સ્વાહા ॥

શ્રદ્ધાયામુદાને નિવિષ્ટોઽમૃતં જુહોમિ ।
શિવો મા વિશાપ્રદાહાય । ઉદાનાય સ્વાહા ॥
શ્રદ્ધાયાँ સમાને નિવિષ્ટોઽમૃતં જુહોમિ ।
શિવો મા વિશાપ્રદાહાય । સમાનાય સ્વાહા ॥
બ્રહ્મણિ મ આત્મામૃતત્વાય ॥ ૩॥
અમૃતાપિધાનમસિ ॥ ૪॥
એકસપ્તતિતમોઽનુવાકઃ ।
અઙ્ગુષ્ઠમાત્રઃ પુરુષોઽઙ્ગુષ્ઠં ચ સમાશ્રિતઃ ।
ઈશઃ સર્વસ્ય જગતઃ પ્રભુઃ પ્રીણાતુ વિશ્વભુક્ ॥ ૧॥
દ્વિસપ્તતિતમોઽનુવાકઃ ।
વાઙ્ મ આસન્ । નસોઃ પ્રાણઃ । અક્ષ્યોશ્ચક્ષુઃ । કર્ણયોઃ
શ્રોત્રમ્ । બાહુવોર્બલમ્ । ઉરુવોરોજઃ । અરિષ્ટા
વિશ્વાન્યઙ્ગાનિ તનૂઃ । તનુવા મે સહ નમસ્તે અસ્તુ મા મા હિँસીઃ ॥ ૧॥
ત્રિસપ્તતિતમોઽનુવાકઃ ।
વયઃ સુપર્ણા ઉપસેદુરિન્દ્રં પ્રિયમેધા ઋષયો નાધમાનાઃ ।
અપ ધ્વાન્તમૂર્ણુહિ પૂર્ધિ ચક્ષુર્મુમુગ્ધ્યસ્માન્નિધયેવ બદ્ધાન્ ॥ ૧॥
ચતુઃસપ્તતિતમોઽનુવાકઃ ।
પ્રાણાનાં ગ્રન્થિરસિ રુદ્રો મા વિશાન્તકઃ । તેનાન્નેનાપ્યાયસ્વ ॥ ૧॥
પઞ્ચસપ્તતિતમોઽનુવાકઃ ।
નમો રુદ્રાય વિષ્ણવે મૃત્યુર્મે પાહિ ॥ ૧॥
ષટ્સપ્તતિતમોઽનુવાકઃ ।
ત્વમગ્ને દ્યુભિસ્ત્વમાશુશુક્ષણિસ્ત્વમદ્ભ્યસ્ત્વમશ્મનસ્પરિ ।
ત્વં વનેભ્યસ્ત્વમોષધીભ્યસ્ત્વં નૃણાં નૃપતે જાયસે શુચિઃ ॥ ૧॥
સપ્તસપ્તતિતમોઽનુવાકઃ ।
શિવેન મે સન્તિષ્ઠસ્વ સ્યોનેન મે સન્તિષ્ઠસ્વ સુભૂતેન મે સન્તિષ્ઠસ્વ

બ્રહ્મવર્ચસેન મે સન્તિષ્ઠસ્વ યજ્ઞસ્યર્દ્ધિમનુસન્તિષ્ઠસ્વોપ તે યજ્ઞ નમ
ઉપ તે નમ ઉપ તે નમઃ ॥ ૧॥

અષ્ટસપ્તતિતમોઽનુવાકઃ ।

સત્યં પરં પરઁ સત્યઁ સત્યેન ન
સુવર્ગાલ્લોકાચ્ચ્યવન્તે કદાચન
સતાઁ હિ સત્યં તસ્માત્સત્યે રમન્તે ॥ ૧॥

તપ ઇતિ તપો નાનશનાત્પરં યદ્ધિ પરં તપસ્તદ્
દુર્ધર્ષં તદ્ દુરાધર્ષં તસ્માત્તપસિ રમન્તે ॥ ૨॥

દમ ઇતિ નિયતં બ્રહ્મચારિણસ્તસ્માદ્દમે રમન્તે ॥ ૩॥

શમ ઇત્યરણ્યે મુનયસ્તસ્માચ્છમે રમન્તે ॥ ૪॥

દાનમિતિ સર્વાણિ ભૂતાનિ પ્રશઁસન્તિ
દાનાન્નાતિદુષ્કરં તસ્માદ્દાને રમન્તે ॥ ૫॥

ધર્મ ઇતિ ધર્મેણ સર્વમિદં પરિગૃહીતં
ધર્માન્નાતિદુશ્ચરં તસ્માદ્ધર્મે રમન્તે ॥ ૬॥

પ્રજન ઇતિ ભૂયાઁસસ્તસ્માત્ ભૂયિષ્ઠાઃ પ્રજાયન્તે
તસ્માત્ ભૂયિષ્ઠાઃ પ્રજનને રમન્તે ॥ ૭॥

અગ્નય ઇત્યાહ તસ્માદગ્નય આધાતવ્યાઃ ॥ ૮॥

અગ્નિહોત્રમિત્યાહ તસ્માદગ્નિહોત્રે રમન્તે ॥ ૯॥

યજ્ઞ ઇતિ યજ્ઞેન હિ દેવા દિવં ગતાસ્તસ્માદ્યજ્ઞે રમન્તે ॥ ૧૦॥

માનસમિતિ વિદ્વાઁસસ્તસ્માદ્વિદ્વાઁસ એવ માનસે રમન્તે ॥ ૧૧॥

ન્યાસ ઇતિ બ્રહ્મા બ્રહ્મા હિ પરઃ પરો હિ બ્રહ્મા તાનિ વા
એતાન્યવરાણિ તપાઁસિ ન્યાસ એવાત્યરેચયત્ ય
એવં વેદેત્યુપનિષત્ ॥ ૧૨॥

એકોનાશીતિતમોઽનુવાકઃ ।

પ્રાજાપત્યો હારુણિઃ સુપર્ણેયઃ પ્રજાપતિં પિતરમુપસસાર કિં

ભગવન્તઃ પરમં વદન્તીતિ તસ્મૈ પ્રોવાચ ॥ ૧॥

સત્યેન વાયુરાવાતિ સત્યેનાદિત્યો રોચતે દિવિ સત્યં વાચઃ
પ્રતિષ્ઠા સત્યે સર્વં પ્રતિષ્ઠિતં તસ્માત્સત્યં પરમં વદન્તિ ॥ ૨॥

તપસા દેવા દેવતામગ્ર આયન્ તપસાર્ષયઃ સુવરન્વવિન્દન્
તપસા સપત્નાન્પ્રણુદામારાતીસ્તપસિ સર્વં પ્રતિષ્ઠિતં
તસ્માત્તપઃ પરમં વદન્તિ ॥ ૩॥

દમેન દાન્તાઃ કિલ્બિષમવધૂન્વન્તિ દમેન બ્રહ્મચારિણઃ
સુવરગચ્છન્ દમો ભૂતાનાં દુરાધર્ષં દમે સર્વં
પ્રતિષ્ઠિતં તસ્માદ્દમઃ પરમં વદન્તિ ॥ ૪॥

શમેન શાન્તાઃ શિવમાચરન્તિ શમેન નાકં મુનયોઽન્વવિન્દન્
શમો ભૂતાનાં દુરાધર્ષં શમે સર્વં પ્રતિષ્ઠિતં
તસ્માચ્છમઃ પરમં વદન્તિ ॥ ૫॥

દાનં યજ્ઞાનાં વરૂથં દક્ષિણા લોકે દાતારꣳ
સર્વભૂતાન્યુપજીવન્તિ દાનેનારાતીરપાનુદન્ત દાનેન
દ્વિષન્તો મિત્રા ભવન્તિ દાને સર્વં પ્રતિષ્ઠિતં તસ્માદ્દાનં
પરમં વદન્તિ ॥ ૬॥

ધર્મો વિશ્વસ્ય જગતઃ પ્રતિષ્ઠા લોકે ધર્મિષ્ઠ પ્રજા
ઉપસર્પન્તિ ધર્મેણ પાપમપનુદતિ ધર્મે સર્વં પ્રતિષ્ઠિતં
તસ્માદ્ધર્મં પરમં વદન્તિ ॥ ૭॥

પ્રજનનં વૈ પ્રતિષ્ઠા લોકે સાધુ પ્રજાયાસ્તન્તું તન્વાનઃ
પિતૃણામનૃણો ભવતિ તદેવ તસ્યાનૃણં તસ્માત્ પ્રજનનં
પરમં વદન્તિ ॥ ૮॥

અગ્નયો વૈ ત્રયી વિદ્યા દેવયાનઃ પન્થા ગાર્હપત્ય ઋક્
પૃથિવી રથન્તરમન્વાહાર્યપચનઃ યજુરન્તરિક્ષં
વામદેવ્યમાહવનીયઃ સામ સુવર્ગો લોકો બૃહત્તસ્માદગ્નીન્
પરમં વદન્તિ ॥ ૯॥

અગ્નિહોત્રꣳ સાયં પ્રાતર્ગૃહાણાં નિષ્કૃતિઃ સ્વિષ્ટꣳ
સુહુતં યજ્ઞક્રતૂનાં પ્રાયણꣳ સુવર્ગસ્ય લોકસ્ય
જ્યોતિસ્તસ્માદગ્નિહોત્રં પરમં વદન્તિ ॥ ૧૦॥

યજ્ઞ ઇતિ યજ્ઞો હિ દેવાનાં યજ્ઞેન હિ દેવા દિવં ગતા
યજ્ઞેનાસુરાનપાનુદન્ત યજ્ઞેન દ્વિષન્તો મિત્રા ભવન્તિ યજ્ઞે
સર્વં પ્રતિષ્ઠિતં તસ્માદ્યજ્ઞં પરમં વદન્તિ ॥ ૧૧॥

માનસં વૈ પ્રાજાપત્યં પવિત્રં માનસેન મનસા સાધુ
પશ્યતિ મનસા ઋષયઃ પ્રજા અસૃજન્ત માનસે સર્વં પ્રતિષ્ઠિતં
તસ્માન્માનસં પરમં વદન્તિ ॥ ૧૨॥

ન્યાસ ઇત્યાહુર્મનીષિણો બ્રહ્માણં બ્રહ્મા વિશ્વઃ કતમઃ
સ્વયમ્ભૂઃ પ્રજાપતિઃ સંવત્સર ઇતિ ॥ ૧૩॥

સંવત્સરોઽસાવાદિત્યો ય એષ આદિત્યે પુરુષઃ સ પરમેષ્ઠી બ્રહ્માત્મા ॥ ૧૪॥

યાભિરાદિત્યસ્તપતિ રશ્મિભિસ્તાભિઃ પર્જન્યો વર્ષતિ
પર્જન્યેનૌષધિવનસ્પતયઃ પ્રજાયન્ત ઓષધિવનસ્પતિભિરન્નં
ભવત્યન્નેન પ્રાણાઃ પ્રાણૈર્બલં બલેન તપસ્તપસા શ્રદ્ધા
શ્રદ્ધયા મેધા મેધયા મનીષા મનીષયા મનો મનસા
શાન્તિઃ શાન્ત્યા ચિત્તં ચિત્તેન સ્મૃતિઃ સ્મૃત્યા સ્મારꣳ
સ્મારેણ વિજ્ઞાનં વિજ્ઞાનેનાત્માનં વેદયતિ તસ્માદન્નં
દદન્સર્વાણ્યેતાનિ દદાત્યન્નાત્પ્રાણા ભવન્તિ ભૂતાનાં
પ્રાણૈર્મનો મનસશ્ચ વિજ્ઞાનં વિજ્ઞાનાદાનન્દો બ્રહ્મ યોનિઃ ॥ ૧૫॥

સ વા એષ પુરુષઃ પઞ્ચધા પઞ્ચાત્મા યેન સર્વમિદં
પ્રોતં પૃથિવી ચાન્તરિક્ષં ચ દ્યૌશ્ચ
દિશશ્ચાવાન્તરદિશાશ્ચ સ વૈ સર્વમિદં જગત્સ
સ ભૂતꣳ સ ભવ્યં જિજ્ઞાસક્લૃપ્ત ઋતજા રયિષ્ઠાઃ
શ્રદ્ધા સત્યો મહસ્વાન્તમસોપરિષ્ટાત્ । જ્ઞાત્વા તમેવં
મનસા હૃદા ચ ભૂયો ન મૃત્યુમુપયાહિ વિદ્વાન્ ।
તસ્માન્ન્યાસમેષાં તપસામતિરિક્તમાહુઃ ॥ ૧૬॥

વસુરણ્વો વિભૂરસિ પ્રાણે ત્વમસિ સન્ધાતા બ્રહ્મન્ ત્વમસિ
વિશ્વસૃત્તેજોદાસ્ત્વમસ્યગ્નેરસિ વર્ચોદાસ્ત્વમસિ સૂર્યસ્ય
દ્યુમ્નોદાસ્ત્વમસિ ચન્દ્રમસ ઉપયામગૃહીતોઽસિ બ્રહ્મણે ત્વા મહસે ॥ ૧૭॥
ઓમિત્યાત્માનં યુઞ્જીત । એતદ્વૈ મહોપનિષદં દેવાનાં
ગુહ્યમ્ । ય એવં વેદ બ્રહ્મણો મહિમાનમાપ્નોતિ તસ્માદ્બ્રહ્મણો
મહિમાનમિત્યુપનિષત્ ॥ ૧૮॥

અશીતિતમોઽનુવાકઃ ।

તસ્યૈવં વિદુષો યજ્ઞસ્યાત્મા યજમાનઃ શ્રદ્ધા પત્ની
શરીરમિધ્મમુરો વેદિર્લોમાનિ બર્હિર્વેદઃ શિખા હૃદયં યૂપઃ
કામ આજ્યં મન્યુઃ પશુસ્તપોઽગ્નિર્દમઃ શમયિતા દાનં
દક્ષિણા વાગ્ઘોતા પ્રાણ ઉદ્ગાતા ચક્ષુરધ્વર્યુર્મનો બ્રહ્મા
શ્રોત્રમગ્નીત્ યાવદ્ધ્રિયતે સા દીક્ષા યદશ્નાતિ
તદ્ધવિર્યત્પિબતિ તદસ્ય સોમપાનં યદ્રમતે તદુપસદો
યત્સઞ્ચરત્યુપવિશત્યુત્તિષ્ઠતે ચ સ પ્રવર્ગ્યો યન્મુખં
તદાહવનીયો યા વ્યાહૃતિરાહુતિર્યદસ્ય વિજ્ઞાનં તજ્જુહોતિ
યત્સાયં પ્રાતરત્તિ તત્સમિધં યત્પ્રાતર્મધ્યન્દિનꣳ સાયં
ચ તાનિ સવનાનિ યે અહોરાત્રે તે દર્શપૂર્ણમાસૌ
યેઽર્ધમાસાશ્ચ માસાશ્ચ તે ચાતુર્માસ્યાનિ ય ઋતવસ્તે
પશુબન્ધા યે સંવત્સરાશ્ચ પરિવત્સરાશ્ચ તેઽહર્ગણાઃ
સર્વવેદસં વા એતત્સત્રં યન્મરણં તદવભૃથ એતદ્વૈ
જરામર્યમગ્નિહોત્રꣳ સત્રં ય એવં વિદ્વાનુદગયને પ્રમીયતે
દેવાનામેવ મહિમાનં ગત્વાદિત્યસ્ય સાયુજ્યં ગચ્છત્યથ યો
દક્ષિણે પ્રમીયતે પિતૃણામેવ મહિમાનં ગત્વા ચન્દ્રમસઃ
સાયુજ્યં ગચ્છત્યેતૌ વૈ સૂર્યાચન્દ્રમસોર્મહિમાનૌ બ્રાહ્મણો
વિદ્વાનભિજયતિ તસ્માદ્ બ્રહ્મણો મહિમાનમિત્યુપનિષત્ ॥ ૧॥
ૐ શં નો મિત્રઃ શં વરુણઃ । શં નો ભવત્યર્યમા । શં

ન ઇન્દ્રો બૃહસ્પતિઃ । શં નો વિષ્ણુરુરુક્રમઃ ।
નમો બ્રહ્મણે । નમસ્તે વાયો । ત્વમેવ પ્રત્યક્ષં બ્રહ્માસિ ।
ત્વામેવ પ્રત્યક્ષં બ્રહ્માવાદિષમ્ । ઋતમવાદિષમ્ ।
સત્યમવાદિષમ્ । તન્મામાવીત્ । તદ્વક્તારમાવીત્ । આવીન્મામ્ । આવીદ્વક્તારમ્ ॥
ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિ નાવધીતમસ્તુ । મા વિદ્વિષાવહૈ ॥
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

It appears that Mahanarayana Upanishad was also known as Yajnikyopanishad, and same as Taittiriya Aranyaka Prapathaka 10. Neither Narayana U. nor Tripad-Mahanarayana U. correspond to this. U-B's bhashya makes no mention of this. It is not mentioned in Muktika U. list of 108 U.

Original text Encoded and proofread by Sunder Hattangadi . Accents by Mandar Mali

*Mahanarayana Upanishad with Vedic Accent*
pdf was typeset on August 14, 2023

Please send corrections to *sanskrit@cheerful.com*